दी, ओ ङ य क्षये। इति कविकल्पद्रुमः॥ (दिवां-आत्मं-अकं-सेट्।) ओ, दीनः। ङ य, दीयते। इति दुर्गादासः॥

दीक्ष, ङ मौण्ड्ये। इज्यायाम्। व्रतादेशे। इति कविकल्पद्रुमः॥ (भ्वां-आत्मं-अकं-व्रतादेशे अकं-सकं च-सेट।) मौण्ड्यं मुण्डितमस्तकीभावः। इज्या यजनम्। व्रतादेशो नियमव्रतादेशोपनीतयः। ङ, दीक्षते वटुर्मुण्डितमस्तकः स्यादित्यर्थः। दीक्षते जनो यजतीत्यर्थः। दीक्षते याज्ञिको नियमी स्यादित्यर्थः। दीक्षते पण्डितो जनं व्रतमुपदिशतीत्यर्थः। दीक्षते पुत्रं विप्रः उपनयतीत्यर्थः। इति दुर्गादासः॥

दीक्षणीयेष्टिः, स्त्री, (दीक्षणीया इष्टिः।) यज्ञविशेषः। तत्पर्य्यायः। सौमिकी २। इति हेमचन्द्रः।३।४८७॥

दीक्षा, स्त्री, (दीक्ष+भावे अ। स्त्रियां टाप्।) यजनम्। पूजनम्। इत्यजयपालः॥ व्रतसंग्रहः। इति हेमचन्द्रः।३।४८७॥ गुरुमुखात् स्वेष्टदेवमन्त्रग्रहणम्। (एतन्निरुक्तिर्यथा, गौतमीयतन्त्रे।७।२।

"ददाति दिव्यतां तावत् क्षिणुयात् पापसन्ततिः।
तेन दीक्षेति विख्याता मुनिभिस्तन्त्रपारगैः॥")

यथाच,—

"दीयते ज्ञानमत्यन्तं क्षीयते पापसञ्चयः।
तस्माद्दीक्षेति सा प्रोक्ता मुनिभिस्तत्त्वदर्शिभिः॥
दिव्यं ज्ञानं यतो दद्यात् कुर्य्यात् पापस्य संक्षयम्।
तस्माद्दीक्षेति सा प्रोक्ता मुनिभिस्तन्त्रवेदिभिः॥
उच्यते प्रथमं तत्र लक्षणं गुरुशिष्ययोः॥"

इत्यत्र गुरुशिष्ययोर्लक्षणं तत्तच्छब्दे द्रष्टव्यम्॥ योगिनीतन्त्रे।

"पितुर्मन्त्रं न गृह्णीयात् तथा मातामहस्य च।
सोदरस्य कनिष्ठस्य वैरिपक्षाश्रितस्य च॥"

रुद्रयामले।

"न पत्नीं दीक्षयेद्भर्त्ता न पिता दीक्षयेत् सुताम्।
न पुत्त्रञ्च तथा भ्राता भ्रातरं न च दीक्षयेत्॥
सिद्धमन्त्रो यदि पतिस्तस्य पत्नीं स दीक्षयेत्।
शक्तित्वेन वरारोहे! न च सा कन्यका भवेत्॥"

तथा गन्धर्वविमर्षिण्याम्।

"यतेर्दीक्षा पितुर्दीक्षा दीक्षा च वनवासिनः।
विविक्ताश्रमिणां दीक्षा न सा कल्याणदायिका॥"

इत्यादिनिषेधवचनादेभ्यो मन्त्रं न गृह्णीयादित्यर्थः। इति तु सिद्धेतरविषयम्। सिद्धमन्त्रो न दुष्यतीति वचनात्॥*॥ शक्तियामले।

"तीर्थाचारव्रती मन्त्री ज्ञानवान् सुसमाहितः।
नित्यनिष्ठो यतिः ख्यातो गुरुः स्याद्गौतिकोऽपि च॥"

सिद्धयामले।

"यदि भाग्यवशेनैव सिद्धविद्यां लभेत् प्रिये!।
तदैव तान्तु दीक्षेत त्यक्त्वा गुरुविचारणम्॥"

गन्धर्वविमर्षिण्याम्।

"प्रमादाच्च तथाज्ञानात् पितुर्दीक्षां समाचरन्।
प्रायश्चित्तं ततः कृत्वा पुनर्दीक्षां समाचरेत्॥"

पितुरित्युपलक्षणम्। मातामहादीनामपि। प्रायश्चित्तन्तु अयुतसावित्रीजपः। सर्व्वत्र तथा दर्शनात्। तथा च श्रुतः।

"दशसाहस्रजप्येन सर्व्वकल्मषनाशिनी।"

श्रीक्रमेऽपि।

"मनुर्विन्ध्य दातव्यो ज्येष्ठपुत्त्राय धीमते॥"

मत्स्यसूक्ते।

निर्वीर्य्यश्च पितुर्मन्त्रं शैवे शाक्ते न दुष्यति॥"

इति कौलिकमन्त्रदीक्षापरम्। योगिनीतन्त्रे श्यामादिविद्यामधिकृत्य दीक्षानिषेधात्। यद्वा शाक्ते तारादिविद्यायां मत्स्यसूक्ते तथा प्रतिपादनात्। तथा च।

"शतसुकृतसहस्रानेकजन्मप्रभावै-
र्भवति यदि मनुष्यो गुर्व्वधीनश्चिराय।
कथमपि मनुमेनं प्राप्य शिष्यः परस्मै
निजकुलतिलकाय ज्येष्ठपुत्त्राय दद्यात्॥" इति।

महातीर्थे उपरागे सति सर्व्वत्र न दोषः। तथा च विष्णुमन्त्रमधिकृत्य।

"साधु पृष्टं त्वया ब्रह्मन्! वक्ष्यामि सकलं तव।
ब्रह्मणा कथितं पूर्व्वं वशिष्ठाय महात्मने॥
वशिष्ठोऽपि स्वपौत्राय मत्पित्रे दत्तवान् स्वयम्।
प्रसन्नहृदयः स्वच्छः पिता मे करुणानिधिः॥
कुरुक्षेत्रे महातीर्थे सूर्य्यपर्व्वणि दत्तवान्॥"

इत्यादि वैशम्पायनसंहितायां शौनकं प्रति व्यासवाक्यम्॥*॥ योगिनीतन्त्रे।

"निर्वीर्य्यश्च पितुर्मन्त्रं तथा मातामहस्य च।
स्वप्नलब्धं स्त्रिया दत्तं संस्कारेणैव शुध्यति॥"

यत्तु।

"साध्वी चैव सदाचारा गुरुभक्ता जितेन्द्रिया।
सर्व्वमन्त्रार्थतत्त्वज्ञा सुशीला पूजने रता॥
गुरुयोग्या भवेत् सा हि विधवापरिवर्ज्जिता।
स्त्रिया दीक्षा शुभा प्रोक्ता मातुश्चाष्टगुणा स्मृता॥"

इदन्तु गुरोरुपासितमन्त्रपरम्। तथा च भैरवीतन्त्रे।

"स्त्रीयमन्त्रोपदेशे तु न कुर्य्याद्गुरुचिन्तनम्।"

मातुरित्युपासितेऽष्टगुणं अनुपासिते शुभफलदमित्यर्थः। सिद्धमन्त्रविषयं वा। वस्तुतस्तु योगिनीतन्त्रे स्त्रीपदं विधवापरम्। एकवाक्यताबलात्॥ दीक्षायां विधवादीनामधिकारं विशेषयति कुलार्णवे।

"विधवायाः सुतादेशात् कन्यायाः पितुराज्ञया।
नाधिकारः स्वतो नार्य्या भार्य्याया भर्त्तुराज्ञया॥"

योगिनीतन्त्रे।

"स्वप्नलब्धे तु कलसे गुरोः प्राणं निवेशयेत्।
वटपत्रे कुङ्कुमेन लिखित्वा ग्रहणं शुभम्॥
ततः शुद्धिमवाप्नोति चान्यथा विफलं भवेत्॥"

इदन्तु सद्गुरोरभावे तन्मते तस्मादेव गृह्णीयात् स्वप्ने तु नियमो न हीति नारदवचनात्॥*॥ तथा विद्याधराचार्य्यधृतजाबालवचनम्।

"मध्यदेशकुरुक्षेत्रनाटकोङ्कणसम्भवाः।
अन्तर्व्वेदिप्रतिष्ठाना आवान्त्याश्च गुरूत्तमाः॥
गौड़ाः शाल्वोद्भवाः सौरा मागधाः केरलास्तथा।
कोशलाश्च दशार्णाश्च गुरवः सप्त मध्यमाः॥
कर्णाटनर्म्मदारेवाकच्छातीरोद्भवास्तथा।
कालिङ्गाश्च कलम्बाश्च काम्बोजाश्चाधमा मताः॥"*॥

तथा।

"वैष्णवे वैष्णवो ग्राह्यः शैवे शैवश्च शाक्तिके।
शैवः शाक्तोऽपि सर्व्वत्र दीक्षास्वामी न संशयः॥"

दीक्षां विना जपस्य दुष्टत्वात् प्रथमं सा निरूप्यते।

"दिव्यं ज्ञानं यतो दद्यात् कुर्य्यात् पापस्य सङ्क्षयम्।
तस्माद्दीक्षेति सा प्रोक्ता मुनिभिस्तन्त्रवेदिभिः॥"

मन्त्रलक्षणमाह। पिङ्गलामते।

"मननं विश्वविज्ञानं त्राणं संसारबन्धनात्।
यतः करोति संसिद्धो मन्त्र इत्युच्यते ततः॥"

अन्यच्च।

"मननात्त्रायते यस्मात्तस्मान्मन्त्रः प्रकीर्त्तितः॥"

सर्व्वाश्रमेषु दीक्षाया आवश्यकत्वम्। तथा च।

"दीक्षामूलं जपं सर्व्वं दीक्षामूलं परं तपः।
दीक्षामाश्रित्य निवसेत् यत्र कुत्राश्रमे वसन्॥
अदीक्षिता ये कुर्व्वन्ति जपपूजादिकाः क्रियाः।
न भवन्ति प्रिये! तेषां शिलायामुप्तबीजवत्॥
देवि! दीक्षाविहीनस्य न सिद्धिर्न च सद्गतिः।
तस्मात् सर्व्वप्रयत्नेन गुरुणा दीक्षितो भवेत्॥
अदीक्षितोऽपि मरणे रौरवं नरकं व्रजेत्।
तस्माद्दीक्षां प्रयत्नेन सदा कुर्य्याच्च तान्त्रिकात्॥
ग्रन्थे दृष्ट्वा तु मन्त्रं वै यो गृह्णाति नराधमः।
मन्वन्तरसहस्रेषु निष्कृतिर्नैव जायते॥
नादीक्षितस्य कार्य्यं स्यात्तपोभिर्नियमव्रतैः।
न तीर्थगमनेनापि न च शारीरयन्त्रणैः॥"

मत्स्यसूक्ते।

"अदीक्षितानां मर्त्यानां दोषं शृणु वरानने!।
अन्नं विष्ठासमं तस्य जलं मूत्रसमं स्मृतम्॥
तत्कृतं तस्य वा श्राद्धं सर्व्वं याति ह्यधोगतिम्॥"

शूद्रस्य मन्त्रविशेषनिषेधमाह।

"प्रणवाद्यं न दातव्यं मन्त्रं शूद्राय सर्व्वथा।
आत्ममन्त्रं गुरोर्म्मन्त्रं मन्त्रं चाजपसंज्ञकम्॥
स्वाहाप्रणवसंयुक्तं शूद्रे मन्त्रं ददद्द्विजः।
शूद्रो निरयमाप्नोति ब्राह्मणो यात्यधोगतिम्॥"

श्रुतिरपि। "सावित्रीं प्रणवं यजुर्लक्ष्मीं स्त्रीशूद्रो यदि जानीयात् स मृतोऽधो गच्छति।" इति॥*॥ विशेषमाह वाराहीये।

"गोपालस्य मनुर्देयो महेशस्यापि पादजे।
तत्पत्नीनाञ्चापि सूर्य्यस्य गणेशस्य मनुस्तथा॥
एषां दीक्षाधिकारी स्यादन्यथा पापभाग्भवेत्॥"

इति॥*॥ गोविन्दवृन्दावने।

"अदीक्षितस्य मरणे प्रेतत्वं न च मुच्यति॥"

नवरत्नेश्वरे।

"सर्व्वासामपि दीक्षाणां मुक्तिः फलमखण्डितम्।
अविरोधात् भवन्त्येव प्रासङ्गिक्यस्तु भक्तयः॥"